संस्कृत — धर्म

अ. नं. २

याज्ञवल्क्यस्मृति - दायभागः

32८ स्मृ : १४

नं - ३८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥श्रीः॥

# याज्ञवल्क्यस्मृतिः

## विज्ञानेश्वरप्रणीता मिताक्षरा व्याख्या.

## व्यवहाराध्याय.

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः॥ तच्च दुष्टनिग्रहमंतरेण न संभवति। दुष्टपरिज्ञानंच न व्यवहार+दर्शनमंतरेण संभवति। तद्व्यवहारदर्शनमहरहः कर्त्तव्यमित्युक्तम्॥

व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोन्वहमिति॥

सच व्यवहारः कीदृशः कतिविधः कथं चेतीति कर्त्तव्यताकलापो नाभिहितस्तदभिधानाय द्वितीयोऽध्याय आरभ्यते॥

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह॥
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥१॥

व्यवहारानिति। अन्यविरोधेन स्वात्मसंबंधितया कथनं व्यवहारः। यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति। अन्योपि तद्विरोधेन मदीयमिति। तस्यानेकविधत्वं दर्शयति बहुवचनेन। नृप इति न क्षत्रियमात्रस्यायं धर्मः किंतु प्रजापालनाधिकृतस्यान्यस्यापीति दर्शयति। पश्येदिति पूर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः। विद्वद्भिर्वेदव्याकरणादिधर्मशास्त्राभिज्ञैर्ब्राह्मणैर्नक्षत्रियादिभिः। ब्राह्मणैः सहेति तृतीयानिर्देशात्तेषामप्राधान्यम्॥

---

+ दर्शनेन विनेति दर्शनं विनेति च पाठांतरम्।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2)



सह युक्तेऽप्रधान इतिस्मरणात्। अतश्चादर्शनेऽन्यथा दर्शनेच राज्ञो दोषो न ब्राह्मणानाम्॥ यथाह मनुः। अदंड्या न्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्। अयशो महदाप्नोति नरकंचैव[२] गच्छतीति॥ कथं धर्मशास्त्रानुसारेण नार्थशास्त्रानुसारेण देशादि समयधर्मस्यापीति धर्मशास्त्राविरुद्धस्य धर्मशास्त्रविषयत्वान्न पृथगुपादानम्। यथाच वक्ष्यति॥ निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च य इति॥ क्रोधलोभविवर्जित इति। धर्मशास्त्रानुसारेणेति सिद्धे क्रोधलोभविवर्जित इति वचनमादरार्थम्। क्रोधोऽमर्षः।लोभो लिप्सातिशयः॥१॥

चाधि

किंच। श्रुताध्ययनसंपन्ना धर्मज्ञाःसत्यवादिनः॥
राज्ञा सभासदः कार्या रिपौ मित्रेच ये समाः॥२॥

श्रुतेन मीमांसाव्याकरणादिश्रवणेन अध्ययनेन वेदाध्ययनेन च संपन्नाः। धर्मज्ञाः धर्मशास्त्रज्ञाः। सत्यवादिनः सत्यवचनशीलाः। रिपौ मित्रे च ये समाः द्वेषरागादि रहिताः एवंभूताः सभासदः सभायां संसदि यथा सीदंति उपविशंति तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः। यद्यपि श्रुताध्ययनसंपन्ना इत्यविशेषेणोक्तं तथापि ब्राह्मणा एव॥

---

२ चैव गच्छति चैव पश्यतीति पाठांतरम्।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)



यथाह कात्यायनः॥ सतु सभ्यैः स्थिरैर्युक्तः प्राज्ञै
र्मौलैर्द्विजोत्तमैः॥ धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशार
दैरिति॥ ते च त्रयः कर्त्तव्याः बहुवचनस्वार्थवत्त्वात्॥ य
स्मिन्देशे निषीदंति विप्रा वेदविदस्त्रय इति मनुस्मरणाच्च॥
बृहस्पतिस्तु॥ सप्त पंच त्रयो वा सभासदो भवंतीत्याह॥
लोकवेदज्ञ धर्मज्ञाः सप्त पंच त्रयोपि वा। यत्रोपविष्टा वि
प्राः स्युः सा यज्ञसदृशी सभेति॥ नच ब्राह्मणैः सहेति
पूर्वश्लोकोक्तानां ब्राह्मणानां श्रुताध्ययनसंपन्ना इत्या
दि विशेषणमिति मंतव्यम्॥ तृतीया प्रथमांत निर्दि
ष्टानां विशेषण विशेष्य भावासंभवात्। विद्वद्भिरित्य
नेन पुनरुक्तिप्रसंगाच्च॥ तथाच कात्यायनेन ब्रा
ह्मणानां सभासदां च स्पष्टं भेदो दर्शितः। स प्राड्विवाकः
सामात्यः स ब्राह्मण पुरोहितः। ससभ्यः प्रेक्षको राजा
स्वर्गे तिष्ठति धर्मत इति॥ तत्र ब्राह्मणा अनियुक्ताः स
भासदस्तु नियुक्ता इति भेदः। अत एवोक्तम्। नियुक्तो
वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हतीति। तत्र नियुक्तानां
यथावस्थितार्थकथनेऽपि यदि राजा अन्यथा करोति
तदासौ निवारणीयोऽन्यथा दोषः। उक्तंच कात्यायनेन॥
अन्यायेनापि तं यांतं येऽनु यांति सभासदः। तेपि तद्भागि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

न स्तस्माद्बो धनीयः स तैर्नृप इति॥ अनियुक्तानां पुनरन्य
थाभिधाने; नभिधाने वा दोषो न तु राज्ञोऽनिवारणे॥
सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसम्॥ अब्रुवन् वि
ब्रुवन्वापि नरो भवति किल्बिषीति मनुस्मरणात्॥ रि
पो मित्रे चेति चकाराल्लोकरंजनार्थं कतिपयैर्वणिग्
भिरप्यधिष्ठितं सदः कर्त्तव्यम्॥ यथाह कात्यायनः॥ कु
लशीलवयोवृत्तवित्तवद्भिरमत्सरैः। वणिग्भिः स्यात्
कतिपयैः कुलभूतैरधिष्ठितमिति॥ ४॥

अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु॥
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्॥३॥

व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्पमाह॥ कार्यांत
रव्याकुलतया व्यवहारान् न पश्यता नृपेण पूर्वोक्तैः सभ्यैः स
ह सर्वधर्मवित् सर्वान् धर्मान् शास्त्रोक्तान् सामयिकांश्च ध
र्मान्वेत्ति विचारयतीति स सर्वधर्मवित् ब्राह्मणो न क्षत्रियादि
र्नियोक्तव्यो व्यवहारदर्शने। तंच कात्यायनेनोक्तगुणविशि
ष्टं कुर्यात्॥ यथाह। दांतं कुलीनं मध्यस्थमनुद्वेगकरं स्थि
रं॥ परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितमिति॥ एवंभूत
ब्राह्मणासंभवे क्षत्रियं वैश्यं वा नियुंजीत न शूद्रम्॥ य
थाह कात्यायनः॥ ब्राह्मणो यत्र नस्यात्तु क्षत्रियं तत्र योज

"Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

येत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेदिति॥ नारदेन त्वयमेव मुख्यो दर्शितः॥ धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः। समाहितमतिः पश्येद्व्यवहाराननुक्रमादिति॥ प्राड्विवाकमते स्थितो न स्वमते स्थितः। राजा चारचक्षुषा परसैन्यं पश्यतीति वत्तस्य चेयं यौगिकी संज्ञा। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैः सह विविनक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः॥ उक्तं च॥ विवादानुगतं पृष्ट्वा ससभ्यस्तत्प्रयत्नतः। विचारयति येनासौ प्राड्विवाकस्ततः स्मृत इति॥३॥

अपि च रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारिणः॥
सभ्याः पृथक् पृथग्दंड्या विवादाद्द्विगुणं दमम्॥४॥

प्राड्विवाकादयः सभ्या यदि रागादिना स्मृत्यपेतं व्यवहारं विचारयंति तदा राज्ञा किं कर्तव्यमित्यत आह॥ पूर्वोक्ताः सभ्या रजसो निरंकुशत्वेन तदभिभूता रागात्स्नेहातिशयात् लोभाल्लिप्सातिशयात् भयात्संत्रासात् स्मृत्यपेतं स्मृतिविरुद्धं आदिशब्दादाचारापेतं कुर्वंतः पृथक् पृथक् एकैकशो विवादात् विवादपराजयनिमित्ताद्दमाद्द्विगुणं दमं दंड्याः। न पुनर्वि द्विवादास्पदीभूताद्द्रव्यात्। तथा सति स्त्रीसंग्रहणादिषु दंडाभावप्रसंगः। रागलोभभयानामुपादानम् रागादिष्वेव द्वि-

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai"

गुणो दमो नाज्ञानमोहादिष्विति नियमार्थम्॥ नच राजा सर्वस्येष्टे ब्राह्मणवर्जमिति गौतमवचनात्॥ न ब्राह्मणा दंड्या इति मंतव्यम्। तस्य प्रशंसार्थत्वात्॥ यत्तु षड्भिः परिहार्यो राजा वंध्यश्चाबंध्यश्चादंड्यश्चाबहिःकार्यश्चापरिवाद्यश्चापरिहार्यश्चेति तदपि स एष बहुश्रुतो भवति। लोकवेदवेदांगविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चाष्टाचत्वारिंशत्संस्कारैःसंस्कृतस्त्रिषुकर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत इति प्रतिपादितबहुश्रुतविषयं न ब्राह्मणमात्रविषयम्॥४॥

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः॥
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥ ५॥

व्यवहारविषयमाह। धर्मशास्त्रसमयाचारविरुद्धेन मार्गेण परैराधर्षितोऽभिभूतो यद्राज्ञे प्राड्विवाकाय वाऽऽवेदयति विज्ञापयति चेद्यदि तदावेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारस्तस्य पदं विषयस्तस्यचेदं सामान्यलक्षणं॥ सच द्विविधः। शंकाभियोगस्तत्वाभियोगश्चेति॥ यथाह नारदः। अभियोगस्तु विज्ञेयः शंकातत्वाभियोगतः। शंकाऽसतां तु संसर्गात्तत्वं होढाभिदर्शना

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

तृइति। होढा लोप्त्रं लिंगमिति यावत्। तेन दर्शनं साक्षा
द्दा दर्शनं होढाभिदर्शनं तस्मात्। तत्वाभियोगोपि द्विवि
धः। प्रतिषेधात्मको विध्यात्मकश्चेति। यथा मत्तो हिरण्या
दिकं गृहीत्वा न प्रयच्छति। क्षेत्रादिकं ममायमपहरतीति
वा॥ उक्तंच कात्यायनेन॥ न्याय्यं स्वं नेच्छते कर्तुम
न्याय्यं वा करोति य इति। स पुनश्चाष्टादशधा भि
द्यते॥ यथाह मनुः॥ तेषामाद्यमृणादानं निक्षेपोऽ
स्वामिविक्रयः। संभूय च समुत्थानं दत्तस्यानपकर्म
च। वेतनस्यैव चादानं संविदश्च व्यतिक्रमः॥ क्रयवि
क्रयानुशये विवादः स्वामिपालयोः। सीमाविवादधर्म
श्च पारुष्ये दंडवाचिके। स्तेयं च साहसं चैव स्त्रीसंग्र
ण हमेव च। स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च॥
पदान्यष्टादशैतानि व्यवहारस्थिताविहेति॥ एतान्य
पि साध्यभेदेन पुनर्बहुत्वं गतानि। यथाह नारदः॥
एषामेव प्रभेदोन्यः शतमष्टोत्तरं भवेत्। क्रियाभेदान्
मनुष्याणां शतशाखो निगद्यत इति॥ आवेदयति चेद्रा
ज्ञे इत्यनेन स्वयमेवागत्यावेदयति न राजप्रेरितस्त
त्पुरुषप्रेरितो वेति दर्शयति॥ यथाह मनुः॥ नोत्पा
दयेत् स्वयं कार्यं राजा वाप्यस्य पूरुषः॥ नच प्रापितम
न्येन ग्रसेतार्थं कथंचनेति॥ परैरिति परेण पराभ्यां

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8)



परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति॥ यत्पुनरेकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च। अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति नारदवचनं तद्भिन्नसाध्यविषयं। आवेदयति राज्ञे इत्यनेनैव राज्ञा पृष्टो विनीतवेष आवेदयेत्। आवेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानमकल्यादीनां चानाह्वानमित्याद्यर्थसिद्धमिति नोक्तम्। स्मृत्यन्तरे तु स्पष्टार्थमुक्तम्॥ यथा। काले कार्यार्थिनं पृच्छेत्प्रणतं पुरतः स्थितम्। किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव॥ केन कस्मिन् कदा कस्मात् पृच्छेदेवं सभागतम्। एवं पृष्टः स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैः सह॥ विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परं। मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत्॥ अकल्यबालस्थविरविषमस्थक्रियाकुलान्॥ कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान्। मत्तोन्मत्तप्रमत्तार्तान् भृत्यान्नाह्वानयेन्नृपः। न हीनपक्षां युवतिं कुले जातां प्रसूतिकां। सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः। तदधीनकुटुंबिन्यः स्वैरिण्यो गणिकाश्च याः। निष्कुला याश्च पतितास्तासामाह्वानमिष्यते। कालं देशं च विज्ञाय कार्याणां च बलाबलं। अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः। ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः। तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति। आसेधव्यवस्थाप्यर्थसिद्धैव नारदेनोक्ता॥ वक्तव्येऽर्थे ह्यतिष्ठन्

१ ता ज्ञातिप्रमुखाः स्मृता इति पाठांतरम्॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9)



तमुत्क्रामंतंच तद्वचः॥ आसेधयेद्विवादार्थी यावदाह्वानदर्शनम्॥ स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा॥ चतुर्विधः स्यादासेधो नासिद्धस्तं विलंघयेत्॥ आसेधकाल आसिद्ध आसेधं योतिवर्त्तते। स विनेयोन्यथा कुर्वन्नासेद्धा दंडभाग्भवेत्॥ नदीसंतारकानूतार दुर्देशोपप्लवादिषु। आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात्॥ निर्वेष्टुकामो रोगार्तो यियिक्षुर्व्यसने स्थितः। अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा। गवा प्रचारे गोपालाः सस्याबाधे कृषीवलाः। शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रह इति। आसेधो राजाज्ञयाऽवरोधः। अकल्पादयः पुत्रादिकमन्यं वा सुहृदं प्रेषयिष्यंति नच ते परार्थवादिनः। यतो न भ्राता नच पिता नपुत्रो न नियोगकृत्। परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्निति नारदवचनात्॥५॥

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना॥
समामासतदर्धाहर्नामजात्यादिचिन्हितम्॥६॥

प्रत्यर्थिनि मुद्रालेख्यपुरुषाणामन्यतमेनानीते किं कुर्यादित्यतआह॥ अर्थ्यत इत्यर्थः साध्यः सोस्यास्तीति अर्थी तत्प्रतिपक्षः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं यथा येन प्रकारेण पूर्वमावेदनकालेआवेदितं तथा। नपुनरन्यथा। अन्यथावादित्वेनव्यवहार[redacted]स्य भंग प्रसंगात्॥ अन्यवादी क्रियाद्वेषी

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10)



नोपस्थाता निरुत्तरः। आहूतः प्रपलायीच हीनः पंचविधः स्मृत इति। आवेदनकाल एवार्थिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह समामासेत्यादि। संवत्सरमासपक्षतिथिवारादिना अर्थि प्रत्यर्थिनाम ब्राह्मणजात्यादिचिन्हितम्। आदिशब्देन द्रव्य तत्संख्या स्थान वेला क्षमा लिंगादीनि गृह्यंते॥ यथोक्तं। अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं। साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च॥ प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमम्। संक्षिप्तं निखिलार्थं च देशकालाविरोधि च। वर्षर्तुमासपक्षाहो वेला देश प्रदेशवत्। स्थाना वसथ साध्याख्या जात्याकार वयोयुतम्। साध्यप्रमाण संख्यावदात्म प्रत्यर्थिनामवत्। परात्मपूर्वजानेकराजनामभिरंकितम्। क्षमा लिंगात्म पीडावत्कथिताहर्तृदायकम्। यदावेद्यते राज्ञे तद्भाषेत्यभिधीयत इति। भाषा प्रतिज्ञा पक्ष इति नार्थांतरं। आवेदनसमये कार्यमात्रं लिखितं प्रत्यर्थिनोग्रतः समामासादिविशिष्टं लिख्यत इति विशेषः। संवत्सरविशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधि प्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते॥ आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेतिवचनात्॥ अर्थव्यवहारेपि एकस्मिन् संवत्सरे । यत्संख्याकं यद्द्रव्यं यतो येन गृही

तं प्रत्यर्पितंच पुनरन्यास्मिन् वत्सरे तद्द्रव्यं तत्संख्या
कं ततस्तेन गृहीतं याच्यमानो यदि ब्रूयात्तत्सत्यं गृही
तं प्रत्यर्पितं चेति वत्सरांतरे गृहीतं प्रत्यर्पितं नास्मि
न्वत्सरे इत्युपयुज्येत। एवं मासाद्यपि योज्यं देश
स्थानादयः पुनः स्थावरेष्वेवोपयुज्यंते॥ देशश्चैव
तथा स्थानं संनिवेशस्तथैवच जातिः संज्ञाधिवासश्च प्र
माणं क्षेत्रनामच। पितृपैतामहं चैव पूर्वराजानुकीर्त्तनम्।
स्थावरेषु विवादेषु दशैतानि निवेशयेदितिस्मरणात्॥
देशोमध्यदेशादिः। स्थानं वाराणस्यादि। संनिवेशस्तत्रैव पूर्वापर
दिग्विभागपरिच्छिन्नः सम्यङ्किंचिद्गृहक्षेत्रादि। जातिरर्थिप्र
त्यर्थिनो ब्राह्मणत्वादिः। संज्ञाच देवदत्तादिः। अधिवासः समीपदे
शे निवासी जनः। प्रमाणं निवर्त्तनादि भूपरिमाणं। क्षेत्रनाम शालि
क्षेत्रं क्रमुकक्षेत्रं। कृष्णभूमिः पांडुभूमिरिति। पितुः पितामह
स्यच नामार्थिप्रत्यर्थिनोः पूर्वपालयितॄणां राज्ञां नाम कीर्त्तनंचेति।
समामासादीनां यस्मिन्व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनी
यमिति तात्पर्यार्थः॥ एवं पक्षलक्षणे स्थिते पक्षलक्षणरहिता
नां पक्षवदवभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण
न पृथक्पक्षाभासा उक्ताः। अन्यैस्तु विस्पष्टार्थमुक्तम्॥* (अप्रसि
द्धादेः साधयितुमशक्यत्वादनिराकरणम्) अप्रसिद्धं निराबाधं
निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जये
त्। अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि।

---

* इदमधिकमिति प्रतिभाति कलिकाता राजधानी मुद्रित पुस्तके
हस्तलिखितान्य पुस्तकेचास्यादर्शनात्॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

निराबाधमस्मद्गृहदीपप्रकाशेनायं स्वगृहे व्यवहरतीत्यादि। नि
रर्थमभिधेयरहितं कचटतपजडदगबेत्यादि। निष्प्रयोजनं यथायं
देवदत्तोऽस्मद्गृहसन्निधौ सुस्वरमधीत इत्यादि। असाध्यं यथाहं देव
दत्तेन सभ्रूभंगमुपहसित इत्यादि। एतत्साधनासंभवादसाध्यम्।
अल्पकालत्वान्न साक्षिसंभवो लिखितं दूरतोऽल्पत्वान्न दिव्यमि
ति। विरुद्धं यथाहं मूकेन शप्त इत्यादि। पुरराष्ट्रादिविरुद्धं वा।
(एतेषां स्वभावेनैव निराकरणमिति न निराक्रियते। तत्र च अप्र
सिद्धादीनां व्युत्पत्त्यर्थमुपादानं तदप्यनेकपदसंकीर्णस्य निरा
करणं न क्रियते) राज्ञा विवर्जितो यश्च यश्च पौरविरोधकृत्। राष्ट्र
स्य वा समस्तस्य प्रकृतीनां तथैव च। अन्ये वा ये पुरग्राममहाज
नविरोधकाः। अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिता इति॥ य
त्त्वनेकपदसंकीर्णः पूर्वपक्षो न जातु सिध्यतीति तत्र यद्यनेकवस्तुसंकी
र्ण इत्युच्यते तदा न दोषः। मदीयमनेन हिरण्यवासोरूपकादि
चापहृतमिति एवं विधस्यादुष्टत्वात्। ऋणादानादि पदसंकरे
पक्षाभास इति चेत्तदपि न। मदीया रूपका अनेन वृद्ध्या गृहीताः
सुवर्णं चास्य हस्ते निक्षिप्तं मदीयं क्षेत्रं भयमपहरतीत्यादीनां प
क्षत्वमिष्यत एव। किंतु क्रियाभेदात् क्रमेण व्यवहारो न युगपदि
त्येतावत्॥ यथाह कात्यायनः॥ बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु नि
श्चितं। कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति॥ यस्मादनेक
पदसंकीर्णः पूर्वपक्षो युगपन्न सिध्यतीति तस्यार्थः॥ अर्थिग्रहणा
त्पुत्रपौत्रादिग्रहणं तेषामेकार्थत्वात्॥ नियुक्तस्यापि नियोगेनैव
तदेकार्थत्वाक्षेपात्॥ अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि
वा॥ यो यस्यार्थे विवदते तयोर्जयपराजयाविति स्मरणात्॥ नि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

युक्तजयपराजयौ मूलस्वामिनोरेव। एतश्च भूमौ फलके वा पांडुलेखेन लिखित्वा आवापोद्धारेण विशोधितं पश्चात्पत्रे निवेशयेत्॥ पूर्वपक्षं स्वभावोक्तमाड्विवाकोऽभिलेखयेत्। पांडुलेखेन फलके ततः पत्रे विशोधितमिति कात्यायनस्मरणात्॥ शोधनं च यावदुत्तरदर्शनं कर्त्तव्यं नातःपरमनवस्थाप्रसंगात्॥ अत एव नारदेनोक्तं॥ शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनं। अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति॥ पूर्वपक्षमशोधयित्वैव यदोत्तरं दापयंति सभ्यास्तदा रागलोभादियुक्तदंडेन सभ्यान्दंडयित्वा पुनः प्रतिज्ञा[1]युक्तं व्यवहारः प्रवर्त्तनीयो राज्ञेति॥६॥

## श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ॥

एवं शोधितपत्रारूढे पूर्वपक्षे किं कर्त्तव्यमित्यत आह॥ श्रुतो भाषार्थो येन प्रत्यर्थिना सोश्रुतार्थः तस्योत्तरं पूर्वपक्षादुत्तरत्र भवतीत्युत्तरं लेख्यं लेखनीयं। पूर्वावेदकस्यार्थिनः सन्निधौ समीपे उत्तरं च यत्पूर्वपक्षस्य निराकरणं तदुच्यते। यथाह। पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं। अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति॥ पक्षस्य व्यापकं निराकरणसमर्थं। सारं न्याय्यं। न्यायादनपेतं। असंदिग्धं संदेहरहितं। अनाकुलं पूर्वापराविरुद्धम्। अव्याख्यागम्यं अप्रसिद्धपदप्रयोगेण दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यत् व्याख्येयार्थं न भवति तत् सदुत्तरम्॥ तच्चतुर्विधं। संप्रतिपत्तिर्मिथ्या प्रत्यवस्कंदनं पूर्वन्यायश्चेति॥

---

१ प्रतिज्ञापूर्वकं.

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

यथाह कात्यायनः। सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा। पूर्वन्याय
विधिश्चैवमुत्तरं स्याच्चतुर्विधं। तत्र सत्योत्तरं यथा। रूपकशतं मह्यं
धारयतीत्युक्ते सत्यं धारयामीति। यथाह। साध्यस्य सत्यवचनंप्र
तिपत्तिरुदाहृतेति। मिथ्योत्तरं तु नाहं धारयामीति। तथाच का
त्यायनः। अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवं। मिथ्या
तत्तु विजानीयादुत्तरं व्यवहारत इति। तच्च मिथ्योत्तरं चतुर्विधं।
मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः। अजातश्चास्मि
तत्काल इति मिथ्या चतुर्विधमिति। प्रत्यवस्कंदनं नाम। सत्यं
गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा। यथाह नारदः। अर्थि
नालिखितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूया
त्प्रत्यवस्कंदनं स्मृतमिति। प्राङ्न्यायोत्तरं तु यत्राभियुक्त
एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तत्र चायं व्यवहार
मार्गेण पराजित इति॥ उक्तंच कात्यायनेन। आचारेणावस
न्नोपि पुनर्लेखयते यदि। सोऽभिधेयो जितः पूर्वं प्राङ्न्याय
स्तु स उच्यत इति। एवमुत्तरलक्षणस्थिते उत्तरलक्षणरहि
तानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धं स्प
ष्टीकृतं च॥ स्मृत्यंतरे। संदिग्धमन्यत् प्रकृतादत्यल्पम
तिभूरि च। पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्॥ यद्व्यस्त
पदमव्यापि निगूढार्थं तथाकुलं। व्याख्यागम्यमसारं च नो
त्तरं स्वार्थसिद्धय इति। तत्र संदिग्धं सुवर्णशतमनेन गृ
हीतमित्युक्ते सत्यं गृहीतं सुवर्णशतं माषशतं वेति प्रकृता
दन्यत्। यथा सुवर्णशताभियोगे पणशतं धारयामीति।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अत्यल्पं सुवर्णशताभियोगे पंच धारयामीति। अतिभूरि सुवर्णशताभियोगे द्विशतं धारयामीति। पक्षैकदेशव्यापि हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतं नान्यदिति। व्यस्तपदं ऋणादानाभियोगे पदांतरेणोत्तरं। यथा सुवर्णशताभियोगे अनेनाहं ताडित इति। अव्यापि देशस्थानादिविशेषणाव्यापि। यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति। निगूढार्थं यथा सुवर्णशताभियोगे किमहमेवास्मै धारयामीत्यत्र ध्वनिना प्राड्विवाकः सभ्यो वा अर्थी वा अन्यस्मै धारयतीति सूचयतीति निगूढार्थं। आकुलं पूर्वापरविरुद्धं। यथा सुवर्णशताभियोगे कृते सत्यं गृहीतं न धारयामीति। व्याख्यागम्यं दुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेन व्याख्यागम्यं। अदेशभाषाभिधानेन वा। यथा सुवर्णशतविषये पितृऋणाभियोगे गृहीतशतवचनात् सुवर्णानां पितुर्न जानामीति। अत्र गृहीतशतस्य पितुर्वचनात् सुवर्णानां शतं गृहीतमिति न जानामीति। असारं न्यायविरुद्धं। यथा सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे न सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति। उत्तरमित्येकवचननिर्देशादुत्तराणां संकरो निरस्तः॥ यथाह कात्यायनः॥ पक्षैकदेशे यत्सत्यमेकदेशे च कारणं। मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति॥ अनुत्तरत्वे च कारणं तेनैवोक्तं। न चैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः। न चार्थसिद्धि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

रुभयोर्नचैकत्र क्रियाद्वयमिति। मिथ्याकारणोत्तरयोः संकरे
अर्थिप्रत्यर्थिनोर्द्वयोरपि क्रिया प्राप्नोति। मिथ्या क्रिया पूर्ववादे
कारणे प्रतिवादिनीति स्मरणात्। तदुभयमेकस्मिन् व्यवहारे वि
रुद्धम्। यथा सुवर्णं रूपकशतं चानेन गृहीतमित्यभियोगे सुव
र्णं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति। कारणप्राङ्न्या
यसंकरे तु प्रत्यर्थिन एव क्रियाद्वयं। प्राङ्न्यायकारणोक्तौ
तु प्रत्यर्थी निर्दिशेत् क्रियामिति। यथा सुवर्णं गृहीतं प्रतिद
त्तं रूपके व्यवहारमार्गेण पराजित इति। अत्र प्राङ्न्याये जयप
त्रेण वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यम्। कारणोत्तरे तु
साक्षिलेख्यादिभिर्भावयितव्यमिति विरोधः। एवमुत्तरत्रय
संकरेऽपि द्रष्टव्यमिति। यथानेन सुवर्णं रूपकशतं वस्त्राणि
च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदत्तं रूपक
शतं च न गृहीतं वस्त्रविषये तु पूर्वन्यायेन पराजित इति।
एवं चतुःसंकरेऽपि। एतेषां चानुत्तरत्वं यौगपद्येन। तस्य
तस्यांशस्य तेन तेनापि नासिद्धेः। क्रमेणोत्तरत्वमेव। क्रम
श्चार्थिनः प्रत्यर्थिनः सभ्यानामिच्छया भवति। यत्र पुन
रुभयोः संकरस्तत्र यस्य प्रभूतार्थविषयत्वं तत्क्रियोपा
दानेन पूर्वं व्यवहारः प्रवर्तनीयः। पश्चादल्पविषयोत्त
रोपादानेन च व्यवहारो द्रष्टव्यः। यत्र संप्रतिपत्तेः उत्त
रांतरस्य च संकरस्तत्रोत्तरांतरोपादानेन व्यवहारो द्रष्टव्यः।
‸री संप्रतिपत्तौ क्रियाभावात्॥ यथा हारीतेन मिथ्योत्तरं का
रणं च स्यातामेकत्र चेदुभे। सत्यं चापि सहान्येन तत्र
ग्राह्यं किमुत्तरमित्युक्तोक्तम्॥ यत् प्रभूतार्थविषयं यत्र

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वा स्यात् क्रिया फलं। उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोन्यथा। संकीर्णं भवतीति शेषः। शेषापेक्षया ऐच्छिकः क्रमो भवतीत्यर्थः। तत्र प्रभूतार्थे यथानेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानि, इत्यभियोगे सत्यं सुवर्णं गृहीतं रूपकशतं च न गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति। अत्र मिथ्योत्तरस्य प्रभूत विषयत्वात् अर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः। पश्चादल्प विषयो व्यवहारः। एवं मिथ्या प्राङ्न्याय संकरे कारण प्राङ्न्याय संकरे च योजनीयं। तथा तस्मिन्नेवाभियोगे सत्यं सुवर्णं रूपक शतं च गृहीतं दास्यामि वस्त्राणि तु न गृहीतानि गृहीतानि प्रतिदत्तानि नीति वा वस्त्र विषये पूर्वं पराजित इति चोत्तरं भवति। पक्षे भूरि विषयत्वे पि तत्र क्रियाभावान् मिथ्योत्तर क्रिया मादाय व्यवहारः प्रवर्त्तयितव्यः। यत्र तु मिथ्या कारणोत्तरयोः कृत्स्न पक्षव्यापित्वं। यथा शैशव प्रभृति कतया रक्षितं इदानीं इयं गौर्मदीया अमुकस्मिन् काले नष्टा अद्यास्य गृहे दृष्टेति। अन्यस्तु मिथ्येतत् एतत् प्रदर्शित कालात् पूर्वमेवास्मद्गृहे स्थिता मम गृहे जाता वेति वदति। इदं तावत्पक्ष निराकरण समर्थत्वान्नानुत्तरम्। नापि मिथ्यैव। कारणोपन्यासात् नापि कारणं एकदेशस्याभ्युपगमाभावात् तस्मात् सकारणं मिथ्योत्तरमिदं॥ अत्र च प्रतिवादिनः क्रिया। कारणे प्रतिवादिनीति वचनात्। ननु मिथ्या क्रिया पूर्ववाद इति पूर्व वादिनः कस्मात् क्रिया न भवति तस्य शुद्ध मिथ्या विषयत्वात्। कारणे प्र

तिवादिनीत्ये तदपि कस्माच्छुद्ध कारण विषयं न भवति। नै
तत्। सर्वस्यापि कारणोत्तरस्य मिथ्या सहचरित रूपत्वात्
शुद्ध कारणोत्तरस्याभावात्॥ प्रसिद्ध कारणोत्तरे प्रति
ज्ञातार्थैकदेशस्याभ्युपगमे नैकदेशस्य मिथ्यात्वम्॥ य
था सत्यं रूपकशतं गृहीतं न धारयामि प्रतिदत्तत्वादि
ति। प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याभ्युपग
मो नास्तीति विशेषः॥ एतच्च हारीतेन स्पष्टमुक्तम्॥
मिथ्याकारणयोर्वापि ग्राह्यं कारणमुत्तरमिति। यत्र
मिथ्या प्राङ्न्याययोःपक्षव्यापित्वं यथारूपकशतं धा
रयतीत्यभियोगे मिथ्यैतदस्मिन्नर्थे पूर्वं मयं पराजि
तइति। अत्रापि प्रतिवादिन एव क्रिया। प्राङ्न्यायका
रणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियामितिवचनात्। शु
द्धस्य प्राङ्न्यायस्याभावादुत्तरत्वप्रसंगात् संप्रति
पत्तेरपि साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वोपन्यासे
न साध्यत्वनिराकरणादेवोत्तरत्वम्॥ यदा तु कारण
प्राङ्न्यायसकरः यथाशतमनेन गृहीतमित्यभियुक्तः
प्रतिवदति सत्यं गृहीतं प्रतिदत्तं चेत्यस्मिन्नेवार्थे प्रा
ङ्न्याये नायं पराजितइति। तत्र प्रतिवादिनो यथारु
चीति न क्वचिद्वादि प्रतिवादिनोरेकस्मिन् व्यवहारेक्रि
याद्वयप्रसंग इति निर्णयः॥

ततोर्थीलेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्॥७॥

A Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

एव मुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधनायत्त
त्वात्साधननिर्देशं कः कुर्यादित्यपेक्षित आह। तत उ
त्तरानंतरमर्थी साध्यवान् सद्य एवानंतरमेवलेखयेत्।
प्रतिज्ञातः साध्यः सचासावर्थश्चेति प्रतिज्ञातार्थः तस्यसा
धनं साध्यते,नेनेति साधनं प्रमाणम्। अत्र सद्यो लेख
येदिति वदतोत्तराभिधाने कालविलंबनमप्यंगीकृत
मितिगम्यते। तच्चोत्तरत्र विवेचयिष्यते। अर्थी प्रतिज्ञा
तार्थ साधनमूले खयेदिति वदता यस्य साध्यमस्ति स प्रति
ज्ञातार्थ साधनं लेखयेदित्युक्तम्। अतश्च प्राङ्न्यायोत्तरे
प्राङ्न्यायस्यैव साध्यत्वात्प्रत्यर्थ्येवार्थी ज्ञात इति स एव
साधनं लेखयेत्। कारणोत्तरेपि कारणस्यैव साध्यत्वात्
कारणवादी वार्थीति स एव लेखयेत्। मिथ्योत्तरे तु पूर्ववा
द्येवार्थी स एव साधनं निर्दिशेत्। तथार्थी लेखयेदितिव
दताअर्थ्येव लेखयेन्नान्य इत्युक्तम्। अतश्च संप्रतिपत्यु
त्तरे साध्याभावेन भाषोत्तरवादिनोर्द्वयोरप्यर्थित्वाभावा
त्साधननिर्देश एव नास्तीति तावतैव व्यवहारः परिसमा
प्यत इति गम्यते॥ एतदेव हारीतेन स्पष्टमुक्तम्॥ प्राङ्न्या
यकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्। मिथ्योक्तौ
पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति॥ ७॥

न तिसिद्धो सिद्धिमाप्नोति विपरीतमतोन्यथा॥

ततः किमित्यत आह। तस्य साधनस्य प्रमाणस्यव

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com